04-12-2020

साहित्यम् । शास्त्री

छन्दविचारः।

"तथाभूतां दृष्ट्वा नृपसदसि पाञ्चालतनयां
वने व्याधैः सार्धं सुचिरमुषितं वल्कलधरैः ।
विराटस्यावासे स्थितमनुचितारम्भनिभृतं
गुरुः खेदं खिन्ने मयि भजति नाद्यापि कुरुषु ॥"
श्रीभट्टनारायण / वेणीसंहार – 1/11

श्लोकस्य प्रत्येके चरणे सप्तदशाक्षराः सन्ति ।
श्लोकस्य चरणे यगणादि निर्णयः →
तथाभूतां दृष्ट्वा नृपसदसि पाञ्चालतनयां ,
। ऽ ऽ ऽ ऽ ऽ । । । । । ऽ ऽ । । । ऽ
यगण मगण नगण सगण भगण लघु गुरु
वने व्याधैः सार्धं सुचिरमुषितं वल्कलधरैः ।
। ऽ ऽ ऽ ऽ ऽ । । । । । ऽ ऽ । । । ऽ
यगण मगण नगण सगण भगण लघु गुरु
यगणादिनिर्णयोपरान्ते ज्ञायते यत् अस्मिन्
पद्ये अत्यष्टिजात्याः शिखरिणी छन्दः अस्ति ।
अस्य छन्दस्य लक्षणमस्ति →
" रसैः रुद्रैश्छिन्ना यमनसभलागः शिखरिणी ।
अस्मिन् छन्दे षड्भिः, एकादशभिः, अक्षरैः यतिः भवति ।

04-12-2020

डॉ० निर्मल कुमार झा (स० प्राचार्यः) ।
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ ।

04-12-2020

अनिवार्य क्रम I उपशास्त्री (प्रथम वर्षम्)

संस्कृत सामान्यम् शब्दरूप: व्याकरणम् ।

भग + मतुप् = "भगवत्" (तकारान्त पुल्लिङ्ग)

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा वि० | भगवान् | भगवन्तौ | भगवन्तः |
| द्वितीया वि० | भगवन्तम् | भगवन्तौ | भगवतः |
| तृतीया वि० | भगवता | भगवद्भ्याम् | भगवद्भिः |
| चतुर्थी वि० | भगवते | ,, | भगवद्भ्यः |
| पञ्चमी वि० | भगवतः | ,, | ,, |
| षष्ठी वि० | ,, | भगवतोः | भगवताम् |
| सप्तमी वि० | भगवति | ,, | भगवत्सु |
| सम्बोधन | हे भगवन् ! | हे भगवन्तौ ! | हे भगवन्तः ! |

एवं प्रकारेण मतुप् प्रत्ययान्तस्य शब्दस्य रूपं भवति । यथा → श्रीमान्, बुद्धिमान्, गोमान्, धीमान्, श्रद्धावान्, अंशुमान्, ज्ञानवान्, धनवान्, रूपवान्, बलवान्, विद्यावान्, क्षमावान्, मतिमान् आदयः ।

04-12-2020

डॉ० निर्मल कुमार झा, स० प्राचार्य
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ
का० सि० द० सं० वि० वि० दरभङ्गा

संस्कृत सामान्यम् । उपशास्त्री II 04-12-2020

अनिवार्यपत्रम् । सन्धिः, सन्धिविच्छेदः ।

1. पूर्वरूप सन्धिः → "एङः पदान्तादति ।"
अयादिसन्धेः अपवादरूपम् ।
रामेऽपि - रामे + अपि । प्रभोऽत्र - प्रभो + अत्र ।
कोऽयम् - कः + अयम् । सोऽवदत् - सः + अवदत् ।

2. प्रगृह्य सन्धिः → ईदूदेद् द्विवचनं प्रगृह्यम् ।
(प्रकृतिभाव सन्धिः)
ईत्, ऊत्, एत् द्विवचनान्त शब्दात् सन्धिकार्यं नैव भवति । यथा →
मुनी + आगच्छतः = मुनी आगच्छतः ।
साधू + इमौ = साधू इमौ । लते + एते = लते एते ।

3.
पररूप सन्धेः अन्यानि उदाहरणानि → "एङि पररूपम् ।"
प्र + एजते = प्रेजते । प्र + एषयति = प्रेषयति ।
उप + ओषति = उपोषति ।

04-12-2020
डॉ० निर्मल कुमार झा, स० प्राध्यापक
रा० उ० सं० महावि० सुखसेना, पूर्णिया
का० सिं० द० सं० वि०वि० दरभङ्गा